दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् श्रावणकृष्णचतुर्थी
श्रावण 17 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-283




अगस्त 02, 2026 Website- www.himsanskritam.com Email-himsanskrit@gmail.com

2 हिमाचल-विधानसभायाः मानसूनसत्रम्-२१ अगस्ततः आरप्स्यते हिमाचल-विधानसभायाः मानसूनसत्रम्, आहत्य १० उपवेशनानि भविष्यन्ति

3 सरदारपटेल- विश्वविद्यालये मण्डीनगरे दीक्षारम्भकार्यक्रमः सम्पन्नः, नवप्रवेशि-छात्राः सम्मानिताः

5 चलच्चित्रवार्ताः प्रथमवारं स्वपुत्रेण करणदेओलेन सह 'बंटवारा १९४७' इति चलच्चित्रे दृष्यते सन्नी देओलः

## राष्ट्रमण्डल-क्रीडोत्सवे महिलानां चतुःपञ्चाशत्-सप्तपञ्चाशत्-किलोग्रामवर्गयोः जैस्मिन-लम्बोरिया, प्रीति-पवार इत्येताभ्यां स्वर्णपदकं विजितम्




ग्लास्गो-नगरे आयोजितासु राष्ट्रमण्डल-क्रीडासु भारतस्य प्रीति-पवार जैस्मिन-लैम्बोरिया च स्व-स्व-अन्तिम-मुष्टियुद्धे 5-0 इति अङ्कान्तरेण विजयं प्राप्य स्वर्णपदकं विजितवत्यौ। अत्रान्तरे त्रि-कूर्दक-क्रीडासु भारतस्य प्रवीण-चित्रावेलेन रजतपदकं सेलवा-प्रभुना च कांस्यपदकं अवाप्तम्। एतेन भारतं साम्प्रतं 7 स्वर्ण-13 रजत 7 कांस्य पदकैः सह आहत्य 27 पदकानि जित्वा तालिकायां षष्ठे स्थाने विराजते ॥

## ताइपे-ओपन-बैडमिन्टन प्रतियोगितायाः चरम-स्पर्धायां प्रविष्टा भारतस्य सप्तदश-वर्षीया क्रीडिका तन्वी शर्मा



ताइपे-ओपन-बैडमिन्टन प्रतियोगितायाः चरम स्पर्धायां प्रविष्टा भारतस्य सप्तदश-वर्षीया क्रीडिका तन्वी शर्मा। चीन-ताइपे-क्रीडिकां पराजित्य अन्तिम स्पर्धां प्राप्ता तन्वी शर्माः अद्य वियतनाम-देशस्य थुई लिन्ह न्गुयेन् इत्यनया सह भविष्यति मुख्य-द्वन्द्वः । अपि च, अन्यस्यां उपान्त्य-स्पर्धायाम् भारतस्य उन्नति-हुड्डा वियतनाम देशस्य थुई लिन्ह न्गुयेन् इत्यस्याः साम्मुख्ये 15-21, 19-21 इति चक्र-द्वये पराजयं प्राप्य स्पर्धातः बहिर्भूता।

## मैसुरुनगरे स्वामी विवेकानन्द-सांस्कृतिक-युव-केन्द्रस्य विवेक-स्मारकस्य उद्घाटनम् अकरोत् - प्रधानमन्त्री




प्रधानमन्त्री नरेन्द्रमोदी मैसुरुनगरे स्वामी विवेकानन्द-सांस्कृतिक-युव-केन्द्रस्य विवेक-स्मारकस्य उद्घाटनम् अकरोत्। एतत् स्मारकं द्विनवत्यधिक-अष्टादशशततमस्य स्वामी-विवेकानन्दस्य मैसुरु-नगरीय ऐतिहासिक-प्रवासस्य स्मृतिं सञ्जीवयति। तस्मिन् काले सः मैसुरु-राज्यस्य दिवान-पदभूषितं सर के. शेषाद्रि-अय्यर् इत्यमुना सह अमिलत् सहैव शिकागो-नगरे आयोजितायां विश्व-धर्म-संसदि भाग-ग्रहणाय अमेरीका-यात्रायै मैसुरु-महाराज्ञः श्री-चामराजेन्द्र-वोडियार-वर्यात् वित्तीय-साहाय्यम् अलभत। अवसरेऽस्मिन् जनसभां सम्बोधयन् प्रधानमन्त्री मोदी अवदत् यत् स्वामीविवेकानन्दः वस्तुतः भारतस्य भावनायाः प्रतीकभूतम् आसीत्। सः सबलं प्रोदीरितवान् यत् देशस्य युवानः वैश्विक विकासं अग्रे वर्धयन्ति । उद्घाटनावसरे प्रधानमन्त्रिणे विवेक-स्मारकस्य भ्रमणं कारितम्, यत्र सः स्वामी-विवेकानन्दस्य प्रतिम्नि पुष्पाञ्जलिं समर्पयत्। अनेनैव सह प्रधानमन्त्री स्मारक-प्राङ्गणे पादपारोपणमपि अकरोत्।

## प्रधानमन्त्री आन्ध्रप्रदेशस्य भोगापुरम-स्थले अल्लूरि-सीताराम-राजू-अन्ताराष्ट्रिय-विमानपत्तनस्य उद्घाटनम् अकरोत्



प्रधानमन्त्री नरेन्द्रमोदी प्रावोचत् यत् आन्ध्रप्रदेशः द्रुतगत्या अग्रे सरति सहैव केन्द्रसर्वकारः विशाल-स्तरीय-आधारभूत संरचनायाः औद्योगिकी-विकासस्य च माध्यमेन स्वर्ण-आन्ध्रस्य अथ विकसित-भारतस्य सङ्कल्पं पूरयितुम् पूर्णतः कटिबद्धो वर्तते। विजयनगरम-जनपदस्य भोगपुरम-स्थले अल्लूरि-सीताराम-राजू-अन्ताराष्ट्रिय-विमानपत्तनस्य उद्घाटनोत्तरं जनसभां सम्बोधयन् प्रधानमन्त्री न्यगादीत् यत् विमानपत्तन मार्गोर्जा-क्षेत्राणि समेत्य अष्टादश-सहस्रकोटि-रूप्यकाणाम् विकास परियोजनाः केन्द्र-राज्ययोः एन.डी.ए-सर्वकारस्य नेतृत्वे राज्यस्य द्रुतगत्या जायमानां प्रगतिं प्रदर्शयति । प्रधानमन्त्रिणा एतत् नवीन विमानपत्तनम् आन्ध्रप्रदेशस्य, विशेषतः उत्तरान्ध्र-क्षेत्रस्य प्रगतेः धावनमार्गः सहैन राज्यस्य यूनाम् आकाङ्क्षाणां क्षेपण-मञ्चः इति प्रतिपादितम्। सः अघोषयत् यत् अस्य विमानपत्तनस्य नामकरणम् स्वतन्त्रता सेनानिनः अल्लूरि-सीताराम-राजू-वर्यस्य नाम्ना कृतम्, यत् आगामि-वंशाय देशभक्तेः समाजसेवायाः च प्रेरणां प्रदास्यति। अत्रावसरे केन्द्रीय-नागरिक विमानन-मन्त्री के. राममोहन-नाइडुः एतस्य विमानपत्तनस्य उद्घाटनम् ऐतिहासिक-कीर्तिमानत्वेन व्यपादिशत्। सहैव तेनोक्तं यत् विमानपत्तनमिदं उत्तर-आन्ध्र-क्षेत्र विकासस्य, निवेशस्य, उद्यमस्य च मुख्य द्वारत्वेन परिवर्तयिष्यति।

## सुभाषितम्

**उत्तमैः सह साङ्गत्यं,**
**पण्डितैः सह सत्कथाम्।**
**अलुब्धैः सह मित्रत्वं,**
**कुर्वाणो नावसीदति।।**

भावार्थः- अर्थात्- उत्तम स्वभाव वाले सज्जनों का संग, विद्वानों के साथ सत्कथा का श्रवण एवं निर्लोभी मनुष्यों के साथ मित्रता रखने वाला कभी दुखी नहीं होता।




सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
ग्रसवां कोटला तहसीलपरिसरस्य समुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्



## राष्ट्रिय-सुरक्षा-परामर्शकः अजीत डोवालः लोकमान्य तिलक- राष्ट्रिय-पुरस्कारेण सम्मानितः

राष्ट्रिय-सुरक्षा-परामर्शकः अजीत डोवालः पुणे-नगरे आयोजिते एकस्मिन् समारोहे लोकमान्य तिलक-राष्ट्रिय पुरस्कारेण सम्मानितः। लोकमान्य तिलक-स्मारक-न्यासेन संस्थापितः एषः पुरस्कारः लोकमान्य बाल-गङ्गाधर तिलकवर्यस्य षडाधिक-शततमे पुण्यतिथ्यवसरे केन्द्रीय गृहमन्त्रिणा अमित-शाहेन प्रदत्तः। अत्रावसरे सम्बोधयन् अमितशाहः अवदत् यत् अजीत डोवालः भारतस्य राष्ट्रिय-सुरक्षायाः सुदृढीकरणे असाधारणं योगदानम् व्याहृतवान्। सः अवदत् यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे राष्ट्रिय-सुरक्षा-सम्बद्धेषु प्रमुख निर्णयेषु डोवालः मुख्य भूमिकां निर्व्यूढवान्। सम्मान-ग्रहणावसरे अज्जीत-डोवालः अवदत् यत् एतेन समादरेण सः अतीव नम्रताम् अनुभवति। सः अवदत् यत् युवा-वंशेन लोकमान्य तिलकस्य देशभक्तेः, त्यागस्य, कर्तव्यनिष्ठायाः च आदर्शाः आत्मसात् करणीयाः।

# नाथूला-द्वारस्य माध्यमेन भारत-चीनयोः मध्ये सीमापार-व्यापारः पुनः प्रारब्धः



सिक्किम-राज्ये स्थितेन नाथूला-पास इति माध्यमेन भारत-चीनयोः मध्ये सीमापार-व्यापारः पुनः प्रारब्धः। येन षड्-वर्षाधिकस्य स्थगनस्य अन्तोऽभवत्। अस्य व्यापारस्य पुनः प्रारम्भः भारत-चीनयोः द्विपक्षीय-सम्बन्धेषु कश्चन सकारात्मकः सङ्केतः वर्तते। उभयोः देशयोः अधिकारिणः 'नो मैन्स लैंड'इति क्षेत्रे परस्परम् अमिलन्। चीन-पक्षस्य नेतृत्वं तिब्बत-स्वायत्त क्षेत्रस्य प्रशासनिक प्रमुखैः सहैव तस्य वाणिज्य-सीमा-व्यापार-विभागयोः प्रतिनिधिभिः कृतम्।

# आतङ्काक्रमणे व्रणितः द्वितीय श्रमिकः चिकित्सालये मृत्युमुपगतः



जम्मू-कश्मीरस्थ कुलगाम-जनपदस्य केलमक्षेत्रे दुरापन्ने आतङ्काक्रमणे व्रणितः द्वितीय श्रमिकः चिकित्सालये मृत्युमुपगतः, येन मृतकानां सङ्ख्या द्वयं समभवत्। वरिष्ठाधिकारिणा विज्ञापितं यत् इतस्ततः अज्ञात आतङ्कवादिभिः इष्टिका-यन्त्रागारे कार्यं कुर्वतोः द्वयोः श्रमिकयोः उपरि भुशुण्डिका-प्रहारः कृतः। घटनायाः पश्चादेव तत् क्षेत्रं अवरुध्य आतङ्कवादीनाम् अन्वेषणाय बृहत्-अभियानम् प्रवर्त्तितम्। उपराज्यपालः मनोज-सिन्हा मुख्यमन्त्री उमर अब्दुल्ला च एतस्य नृशंस हत्याकाण्डस्य तीव्र-गर्हणां अकुरुतां मृतानां परिवारिजनेभ्यः च संवेदनां प्रकटितवन्तौ। उपराज्यपालः सुरक्षाबलानि क्षेत्रे आतङ्कवादीनां निष्प्रभावीकरणाय अभियानानां तीव्रीकरणाय च समादिशत्। मुख्यमन्त्रिणा मृतकयोः परिजनेभ्यः मुख्यमन्त्री रिलीफ-कोषतः दशलक्ष-रूप्यकाणां अनुग्रहराशेः घोषणा कृता, एतदतिरिच्य कुलगाम-जनपद-प्रशासनेन षट्लक्ष-रूप्यकाणां साहाय्यमपि प्रदास्यते।

# हिमाचल-विधानसभायाः मानसूनसत्रम्- २१ अगस्ततः आरप्स्यते

## हिमाचल- विधानसभायाः मानसूनसत्रम्, आहत्य १० उपवेशनानि भविष्यन्ति

**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेश- विधानसभायाः मानसूनसत्रं २१ अगस्त २०२६ दिनाङ्कतः आरप्स्यते। राज्यपालः कविन्द्रगुप्तः भारतीयसंविधानस्य १७४(१) अनुच्छेदस्य अन्तर्गत-प्रदत्त-शक्तीनाम् उपयोगं कुर्वन् हिमाचलप्रदेशस्य १४तम विधानसभायाः १२ तम सत्रस्य आह्वानं कृतवान्। इदं सत्रं ३ सितम्बर यावत् प्रलिष्यति। अस्मिन् अन्तराले आहत्य १० उपवेशनानि आयोजयिष्यन्ते। विधायकाः राज्य-विधानसभा- सचिवालयं प्रति स्वप्रश्नान् अन्यनियमानां च अन्तर्गतसूचनाः प्रेषयितुं शक्नुवन्ति। राज्य- विधानसभा-अध्यक्षः कुलदीपसिंह पठानिया अस्याः सूचनायाः घोषणां कृतवान्। राज्यपालस्य संस्तुत्याः अनन्तरं विधानसभा-सचिवालयेन शनिवासरस्य अस्य अधिसूचना निर्गता।

पठानिया उक्तवान् यत् २२ अगस्तदिने शनिवासरे अपि उपवेशनम् आयोजयिष्यते। तथापि, २८, २९ एवं ३० अगस्तदिनेषु किमपि उपवेशनं न भविष्यति। २८ अगस्त-दिने रक्षाबन्धनस्य, २९ अगस्तदिने च शनिवासरस्य कारणात् उपवेशनं न आयोजयिष्यते।




३० अगस्तदिने रविवासरः अस्ति। एतदतिरिच्य, २३ एवं ३० अगस्तदिनेषु रविवासरस्य विरामः भविष्यति। सः उक्तवान् यत् २७ अगस्तदिनं गैर-सरकारी- सदस्य- कार्य- दिवसाय निर्धारितम् अस्ति। सत्रस्य अधिसूचनायाः निर्गमनात् परं सदस्याः स्व-निर्वाचनक्षेत्रैः सम्बद्धाः सूचनाः 'ऑफलाइन' एवं 'ऑनलाइन' माध्यमेन राज्य-विधानसभा- सचिवालयं प्रेषयितुं शक्नुवन्ति। अधिसूचनानुगुणं विधानसभायाः १२ तमं सत्रं शुक्रवासरे, २१ अगस्त २०२६ दिनाङ्के प्रातः ११:०० वादने हिमाचलप्रदेश- विधानसभा-भवने, शिमलानगरे प्रारप्स्यते। इयम् अधिसूचना ३० जुलाई २०२६ दिनाङ्के राज्यपालेन जारीकृत- आदेशस्य आधारेण एक अगस्तदिने सामान्यसूचनायै प्रकाशिता अस्ति। विधानसभासचिवालयस्य पक्षतः निर्गत-आदेशे सचिवस्य यशपालशर्मणः हस्ताक्षरम् अस्ति। अधिसूचनायाः प्रतयः सर्वेभ्यः विधायकेभ्यः, हिमाचलात् लोकसभा-राज्यसभा-सांसदेभ्यः, मुख्य-सचिवाय, मुख्यमन्त्रिणः प्रधान-सचिवाय, उपमुख्यमन्त्रिणे, विपक्षनेत्रे, सर्वेभ्यः विभागाध्यक्षेभ्यः अन्येभ्यः सम्बद्ध-अधिकारिभ्यः च प्रेषिताः सन्ति। मानसूनसत्रस्य अन्तराले प्रदेशसर्वकारः बहूनि पूर्णविधेयकानि, वित्तीयप्रस्तावान् जनहितसम्बद्धविषयान् च सदने उपस्थापयितुं शक्नोति। अपरपक्षे विपक्षः अपि प्रदेशे आपदाप्रबन्धने, मार्ग-विद्युत्- जल- स्वास्थ्य- शिक्षा-बेरोजगारी-आदिषु अन्यविषयेषु च सर्वकारम् आवेष्टयितुं रणनीतिं रचयति। एवञ्च आगामिसत्रस्य अन्तराले सत्ताविपक्षयोः मध्ये तीक्ष्णा वाग्मी-चर्चा द्रष्टुं प्राप्येत। प्रदेशस्य राजनीतिदृष्ट्या इदं सत्रं महत्त्वपूर्णं मन्यते, यतो हि अस्मिन् विविधानां विभागानां कार्याणाम्, विकासयोजनानां सर्वकारस्य नीतीनां च उपरि विस्तारेण चर्चायाः सम्भावना अस्ति।

# छात्रविरोधात् परम् अवनतं 'नौणी- विश्वविद्यालय- प्रशासनम्', शुल्कवृद्धिः न्यूनीकृता

**हिमसंस्कृतवार्ताः- सोलनम्।** डॉ. वाई. एस. परमार- उद्यान- वानिकी- विश्वविद्यालयः, नौणी इत्यनेन वर्धितः शुल्कः न्यूनीकृतः। अनेन छात्राः अपि आश्वास-श्वासं गृहीतवन्तः। विश्वविद्यालय-प्रशासनेन शुल्क-वृद्धौ १९ सहस्रतः ३७ सहस्ररूप्यकाणि यावत् न्यूनीकरणं कृतम् अस्मिन् विषये अधिसूचना चापि प्रसारिता। विश्वविद्यालयेन कतिपयदिनेभ्यः पूर्वमेव वर्तमान- शैक्षणिकसत्राय बी. एससी., पी.जी. पाठ्यक्रमाणां शुल्के २५ सहस्रतः ५५ सहस्र-रूप्यकाणां वृद्धिः कृता आसीत्। अनेन निर्धन-परिवारेभ्यः नौणी- विश्वविद्यालये प्रवेशग्रहणं महदाह्वानं सञ्जातम् आसीत्। यद्यपि अधुना अपि शुल्कः अधिकः अस्ति, परन्तु गतेभ्यः २ दिनेभ्यः विश्वविद्यालय-प्रशासनस्य छात्रैः सह अभूतायां गोष्ठ्यां शुल्कं न्यूनीकर्तुं निर्णयः गृहीतवान्। विश्वविद्यालय-प्रशासनेन अपि शुल्क-वर्धनस्य काश्चन विवशताः छात्राणां सम्मुखं प्रस्तुताः। शुल्कवर्धनात् परं जायमानं विरोधं दृष्ट्वा नौणी-विश्वविद्यालय- प्रशासनेन अस्य पुनरीक्षणस्य आश्वासनं दत्तम् आसीत्। ज्ञायते यत् वित्त- समित्याः निर्देशेन शुल्कः वर्धितः आसीत्। अस्य सत्रस्य कृते बी.एससी. सामान्य-आसनस्य शुल्कः ४३,३५० रूप्यकतः वर्धयित्वा ६८,७०० रूप्यकाणि यावत् कृतः आसीत्, परन्तु अधुना एतत् न्यूनीकृत्य ४९,५०० रूप्यकाणि कृतम्। अनेन प्रकारेण छात्रेभ्यः १९,२०० रूप्यकाणां साहाय्यं प्राप्तम्।



अस्मिन् प्रवेशशुल्कं पूर्वं ७,००० तः १५,००० कृतम् आसीत्, यः अधुना पुनः ७,००० रूप्यकाणि कृतम् पञ्जीकरणशुल्कं ५,००० तः ७,५०० रूप्यकाणि कृतम् आसीत्, यः अधुना पुनः ५,००० रूप्यकाणि कृतम्, शिक्षणशुल्कं १२,००० तः वर्धयित्वा १६,५०० रूप्यकाणि कृतम् आसीत्, यः घटयित्वा १४,००० रूप्यकाणि कृतम् अस्ति। क्रीडाशुल्कं २,००० तः ३,५०० वर्धितमासीत्, अधुना एषः पुनः २,००० रूप्यकाणि भविष्यति। परीक्षाशुल्कं ३,००० तः ५,००० वर्धितम् आसीत्, यद् न्यूनीभूय ४,००० रूप्यकाणि कृतम्। रक्षणकोषः २,५०० तः ५,००० रूप्यकाणि वर्धितः आसीत्, यः अधुना ३,००० रूप्यकाणि भविष्यति। 'प्लेसमेंट-गाइडेंस-शुल्कं' २०० तः १,००० रूप्यकाणि कृतम् आसीत्, यद् न्यूनीकृत्य ३०० रूप्यकाणि कृतम्। शैक्षणिक-यात्रा-शुल्कं ३,५०० रूप्यकाणि, परिचय-पत्र-शुल्कं ५००, ग्रन्थागार- कार्डशुल्कं ५००, ग्रन्थागार-सेवा-शुल्कं १,०००, महाविद्यालय-सुरक्षाकोषः १,०००, ग्रन्थागारशुल्कः १,०००, 'एमैल्गमेटेड फंड' २,०००, औषधीयशुल्कः १,०००, एन.सी.सी., एन.एस.एस., 'स्काउट्स-एंड-गाइड्स'-शुल्कं १,०००, छात्र-सङ्घशुल्कं ५००, 'ग्रीन चार्जेस' ५००, आर.ए.डब्ल्यू. प्रशिक्षणं १२ शतानि, 'मैगजीन' शुल्कं ५०० रूप्यकाणि कृतानि सन्ति। एवमेव बी.एससी. 'सैल्फ-फाइनेंसिंग' आसनस्य शुल्कः ८३,३५०तः वर्धयित्वा १,२७,२०० रूप्यकाणि कृतम् आसीत्। विश्वविद्यालय-प्रशासनेन एषः १,२७,००० रूप्यकेभ्यः न्यूनीकृत्य ९९,९९० रूप्यकाणि कृतः। अनेन छात्रेभ्यः २७,०१० रूप्यकाणां साहाय्यं प्राप्तम्। एम.एससी., एम.टेक., एम.बी.ए. सामान्य- आसनस्य शुल्कः ४७,५५० तः वर्धयित्वा ८७,००० रूप्यकाणि कृतः आसीत्। अधुना एषः घटयित्वा ५५,००० रूप्यकाणि कृतः। पी.जी. छात्रेभ्यः अस्मिन् ३२,००० रूप्यकाणां साहाय्यं दत्तम्। एम. एससी., एम.टेक., एम.बी.ए. 'सैल्फ- फाइनेंसिंग' आसनस्य शुल्कः ८७,५५० रूप्यकेभ्यः वर्धयित्वा १,४२,००० रूप्यकाणि कृतः आसीत्। एषः अपि घटयित्वा १,०५,००० रूप्यकाणि कृतः। अनेन प्रकारेण छात्रेभ्यः अस्मिन् ३७ सहस्र-रूप्यकाणां साहाय्यं प्राप्तम्। नौणी-विश्वविद्यालयस्य कुलाधिपतिः डॉ. एच.एस. बवेजा ज्ञापितवान् यत् तेन वर्धितं शुल्कम् आदाय 'रिव्यू' (पुनरीक्षणं) कर्तुम् आश्वासनं दत्तम् आसीत्। गतेभ्यः २ दिनेभ्यः एतद् आदाय मन्थनं चलत् आसीत्। विश्वविद्यालयेन वर्धितः शुल्कः अधुना अतीव न्यूनः कृतः। अनेन छात्रेभ्यः महती सहायता प्राप्ता।

# सरदारपटेल- विश्वविद्यालये मण्डीनगरे दीक्षारम्भकार्यक्रमः सम्पन्नः, नवप्रवेशि-छात्राः सम्मानिताः




**हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा।** सरदारपटेल-विश्वविद्यालये मण्डीनगरे नवप्रवेशि- छात्राणां कृते आयोजितस्य दीक्षारम्भकार्यक्रमस्य समापनसमारोहः विश्वविद्यालयस्य अमृतमहोत्सवसभागारे सम्पन्नः अभवत्। अस्मिन् अवसरे विश्वविद्यालयस्य अधिकारिणः, शिक्षकाः, कर्मचारिणः, महत्यां सङ्ख्यायां नवप्रवेशि-छात्राः च उपस्थिताः आसन्।समारोहस्य मुख्यातिथिः विश्वविद्यालयस्य माननीयः कुलपतिः आचार्यः ललितकुमार अवस्थी आसीत्। कार्यक्रमस्य अध्यक्षतां छात्रकल्याण-अधिष्ठाता आचार्यः राजेशकुमारशर्मा अकरोत्। सर्वप्रथमं सह- छात्रकल्याण-अधिष्ठाता डॉ. राकेशकुमारशर्मा मञ्चासीन-अतिथीनां परिचयं स्वागतं च कुर्वन् कार्यक्रमस्य रूपरेखाम् उपस्थापितवान्। समारोहे नवप्रवेशि-छात्र्यः परलमहोदया, अञ्जली, आकाङ्क्षा च दीक्षारम्भकार्यक्रमस्य अन्तराले प्राप्तान् स्व- अनुभवान् संविभक्तवत्यः। छात्राः विश्वविद्यालयस्य शैक्षणिक- सह- शैक्षणिकगतिविधीनां, शिक्षकाणां मार्गदर्शनस्य, नूतनवातावरणेन सम्बद्धाः स्व-सकारात्मक-अनुभूतीः च प्रकटितवन्तः। तदुपरान्तं छात्रकल्याण-अधिष्ठाता आचार्यः राजेशकुमारशर्मा दीक्षारम्भकार्यक्रमस्य सङ्क्षिप्तप्रतिवेदनम् उपस्थापितवान्। सः सूचितवान् यत् कार्यक्रमस्य अन्तराले छात्राणां कृते विभिन्न-शैक्षणिक- सांस्कृतिक- प्रेरणात्मक- जागरूकता-सम्बन्धिगतिवीधीनाम् आयोजनं कृतम्। तेन सह एव ते विश्वविद्यालयस्य शैक्षणिकव्यवस्थया, परीक्षाप्रणाल्या, अनुसन्धानेन, पुस्तकालयेन, क्रीडया, सांस्कृतिक-गतिविधिभिः, छात्र- सहायता- सेवाभिः, अनुशासन-सम्बन्धि- महत्त्वपूर्ण- सूचनाभिः अवगतं कारिताः।स्वप्रेरणादायिसम्बोधने कुलपतिः आचार्यः ललितकुमार अवस्थी अवदत् यत् विश्वविद्यालयः केवलम् उपाधिप्रदानस्य (डिग्री इत्यस्य) केन्द्रं नास्ति, अपि तु व्यक्तित्वनिर्माणस्य, नैतिकमूल्यानां, नेतृत्वक्षमतायाः सामाजिक- उत्तरदायित्वस्य च विकासस्य सशक्तः मञ्चः अस्ति। सः अकथयत् यत् तस्य पूर्णः विश्वासः अस्ति यत् सरदार-पटेल-विश्वविद्यालयस्य छात्राः ज्ञानं, चरित्रं, सेवायाः भावनां च आत्मसात् कुर्वन्तः समाजस्य राष्ट्रस्य च विकासे महत्त्वपूर्णां भूमिकां निर्वक्ष्यन्ति, विश्वविद्यालयस्य प्रतिष्ठां नूतनशिखरं यावत् नेष्यन्ति। अस्मिन् अवसरे मुख्यातिथिः दीक्षारम्भकार्यक्रमे उत्कृष्टं प्रदर्शनं कृतवद्भ्यः छात्रेभ्यः प्रमाणपत्रं सम्मानं च प्रदाय तान् सम्मानितवान्।प्रथमस्थानं प्राप्तवत्सु इतिहासविभागात् पर्वशर्मा रञ्जनकुमारी च, रसायन-विज्ञान-विभागात् अञ्जली मृदुलश्च सम्मिलिताः आसन्। द्वितीयस्थाने भूमिका, चेतना, हर्षितावर्मा, पयस्विनी, पूजादेवी, पूजनः, पूर्णिमा, विनोदः, योगेशश्च आसन्। तत्रैव तृतीयस्थानं प्राप्तवत्सु छात्रेषु आकाङ्क्षा, अञ्जली, आयुषः, आयुषठाकुरः, कसक, मनस्वी, नेहाकुमारी, नितिका, वसुन्धरा च सम्मिलिताः आसन्। सर्वेभ्यः छात्रेभ्यः मुख्यातिथिना प्रमाणपत्रं सम्मानं च प्रदाय तेषाम् उपलब्धिभ्यः वर्धापनं प्रदत्तम्। समारोहे कुलसचिवः शशिपाल नेगी, डॉ. पवनकुमार चन्दः, डॉ. सनीलठाकुरः, डॉ. लखवीरसिंहः, डॉ. नीलममहोदया, चेतनचौहानः, डॉ. नेहा, डॉ. सरिता, राजेशशर्मा, विकेशकुमारश्च एतैः सह आयोजनसमितिसदस्याः, शिक्षकाः, कर्मचारिणः, छात्राश्च उपस्थिताः आसन्। राष्ट्रगानेन, समूहछायाचित्रेण, अल्पाहारेण च सह दीक्षारम्भ-कार्यक्रमस्य औपचारिकं समापनम् अभवत्।

# चम्बा-मण्डलस्य आपदः समीक्षां कर्तुं सम्प्राप्तः मुख्यमन्त्री, प्रभावित-परिवारैः मेलनम् अकरोत्, साहाय्य-कार्याय दत्तः निर्देशः



**हिमसंस्कृतवार्ताः- चम्बा।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः चम्बा-मण्डलस्य आपदाप्रभावितान् क्षेत्रान् सम्प्राप्य वर्तमान- मानसूनकाले अभूतेन महता वर्षणेन भूस्खलनेन च जातस्य क्षतेः समीक्षाम् अकरोत्। अस्मिन् अवसरे तेन प्रभावित-क्षेत्राणाम् स्थलीयपरीक्षणं कृतम्। स्थानीयजनैः सह च सम्भाषणं कृत्वा तेषां समस्यानां कठिनतानां च ज्ञानं प्राप्तम्। मुख्यमन्त्री सर्वप्रथमं शीतलासेतुं सुल्तानपुरस्य राणा-मोहल्लाक्षेत्रं च सम्प्राप्तः, यत्र अस्मिन् मानसूनकाले महती क्षतिः जाता। तेन प्रभावितपरिवारैः सह मेलनं कृत्वा तेषां समस्याः श्रुताः आश्वासनं च दत्तं यत् राज्यसर्वकारः एतस्याः आपदः निष्क्रमणाय तेभ्यः सर्वसम्भवसहाय्यतां प्रदास्यति। तेन अधिकारिणः निर्दिष्टाः यत् आवश्यक- सुविधानां शीघ्रपुनर्स्थापनं निश्चिता क्रियेत, क्षतिग्रस्तमार्गाणाम् अन्येषाम् मूलभूत-संरचनानां च संरक्षणं प्राथमिकता-आधारे पूर्णं क्रियेत। तेनोक्तं यत् गते वर्षे अपि मानसूनकाले चम्बामण्डले महती क्षतिः जाता आसीत् अस्मिन् वर्षे अपि मण्डलेन महत्याः क्षतेः सम्मुखीकरणं कृतम्। तेन प्रोक्तं यत् हिमाचलप्रदेशसर्वकारः आपदा-प्रभावित-परिवारैः सह दृढतया तिष्ठति तेभ्यश्च साहाय्यतां प्रदातुं सर्वसम्भवप्रयासान् करोति। तेन कथितं यत् क्षतिग्रस्तानां मूलभूत- संरचनानां मार्गाणां च पुनर्स्थापनस्य कार्यम् अपि प्राथमिकता-आधारे क्रियमाणम् अस्ति। एतस्य अनन्तरं मुख्यमन्त्रिणा सुल्तानपुरमध्ये निर्मीयमाणस्य 'हेलीपोर्ट' इत्यस्य निरीक्षणं कृतम्। तेन प्रोक्तं यत् अस्य 'हेलीपोर्ट' इत्यस्य निर्माणं प्रायः १२ कोटिरूप्यकाणाम् अनुमानितव्ययेन क्रियमाणम् अस्ति। अस्य पूर्णे सति चम्बामण्डलस्य विकासाय नूतना गतिः लप्स्यते तथा च क्षेत्रे पर्यटनस्य प्रोत्साहनं भविष्यति। तेन उक्तं यत् राज्यसर्वकारः अस्य वर्षस्य अन्तं यावत् अथवा आगामिवर्षस्य प्रारम्भे चम्बामण्डले 'हेलीकॉप्टर' सेवाः आरब्धुं प्रयासरतः अस्ति। अस्याः सुविधायाः वैमानिक-सम्पर्कः श्रेष्ठः भविष्यति पर्यटनसहितं मण्डलस्य अन्येभ्यः विकासात्मककार्येभ्यः अपि गतिः लप्स्यते। अस्मिन् अवसरे हिमाचलप्रदेश-विधानसभायाः अध्यक्षः कुलदीपसिंहपठानिया, चम्बाक्षेत्रस्य विधायकः नीरज नैयरः, पूर्वमन्त्रिणी आशाकुमारी, जिला-काङ्ग्रेस-समित्याः अध्यक्षः सुरजीत भरमौरी, उपायुक्तः मुकेशरेपसवालः, आरक्षणाधीक्षकः विजयकुमारसकलानी अन्ये च मान्याः जनाः उपस्थिताः आसन्।

# भारतचीनव्यापारः शिपकी-ला-स्थानतः चीनदेशेन सह व्यापारः आरब्धः

## षड्भ्यः वर्षेभ्यः परं पुनर्स्थापितः, अश्वाभ्यः वस्तूनि आरोप्य तिब्बतदेशं गताः भारतीयव्यापारिणः



**हिमसंस्कृतवार्ताः- किन्नौरम्।** किन्नौरस्य शिपकी-ला-मार्गस्य माध्यमेन शनिवासरे चीनदेशेन सह सीमावर्ती-व्यापारः आरब्धः अभवत्। अस्मात् मार्गात् द्वयोः देशयोः मध्ये षड्भ्यः वर्षेभ्यः परं व्यापारः पुनः आरब्धः अस्ति। प्रथमे दिने किन्नौरस्य पूह-उपमण्डलस्य १६ व्यापारिणः स्वकीयानि वस्तूनि आदाय तिब्बतदेशं प्रति प्रस्थिताः। राजस्व-वानिकीमन्त्री जगतसिंहनेगी शिपकी-ला-सीमायाः चतुरः किलोमीटर-मितं पूर्वं निर्मित- छुप्पन- 'ट्रेडमार्ट'-स्थानात् तिब्बतदेशं गच्छतां व्यापारिणां वाहनानि हरितपताकां दर्शयित्वा प्रस्थापितवान्। इतः पूर्वं मन्त्री व्यापारिणां 'खतक' (अङ्गवस्त्रम्) परिधाप्य सम्मानं कृतवान्। भारतीय-व्यापारिणः चतुरः किलोमीटरमितं दूरे शिपकी-ला-स्थितां वास्तविक-नियन्त्रण-रेखाम् यावत् स्वकीयानि वस्तूनि वाहनैः नीतवन्तः। तत्र वस्तूनि वाहनेभ्यः अवतार्य अश्वाभ्यः आरोपितानि। अस्य परम् आई.टी.बी.पी. सैनिकाः परीक्षणात् परं व्यापारिभ्यः सीमापारं गन्तुम् अनुमतिं दत्तवन्तः। अस्मिन् अवसरे उपायुक्तः किन्नौर डॉ. अमितकुमारशर्मा, आरक्षणाधीक्षकः सुशीलकुमारः, शिपकी-ला-व्यापार-अधिकारी भीमसिंहनेगी अन्ये च अधिकारिणः उपस्थिताः आसन्।



## षड्वर्षेभ्यः उत्तरं लिपूलेख दर्रा-उपात्यकाभ्यो भारत-चीन सीमा व्यापारश्शुभारब्धः, भारतीय व्यापारिणां प्रथम दलं तकलाकोटं प्राप्नोत्

**धीरजमैथानी, पिथौरागढ़म्/धारचूला,०१ अगस्तमासः ।** कोविड १९ महामारीकारणेन प्रायः षड्वर्षेभ्यः निरुद्धः भारतचीनसीमाव्यापारः शनिवासरे उत्तराखण्डस्य पिथौरागढजनपदे स्थितेन ऐतिहासिकेन लिपूलेखदरेण पुनः प्रारब्धः। वर्षस्य २०२६ तमस्य सीमाव्यापारस्य शुभारम्भेन सह भारतीयवणिजां प्रथमः दलः तिब्बतस्य तकलाकोटनगरम् उपगतः, यत्र आवश्यकाः औपचारिकप्रक्रियाः सम्पन्नाः कृत्वा व्यापारिकक्रियाकलापाः आरब्धाः। भारततिब्बतव्यापारसङ्घस्य अध्यक्षस्य जीवनसिंहरौकली नेतृत्वे षोडश पञ्जीकृतवणिजः चत्वारः सहायकाश्च सहिताः विंशतिसदस्यात्मकः दलः सर्वाः निर्धारितप्रक्रियाः सम्पन्नाः कृत्वा लिपूलेखदरेण चीनस्य तिब्बतस्वायत्तप्रदेशे प्रविश्य तकलाकोटमण्डीं प्राप्तवान्। धारचूलायाः उपजिलाधिकारी आशीषजोशी अवदत् यत् ३१ जुलाई सायंकाले व्यापारिकदलेन गुंजीस्थिते आप्रवासनकार्यालये सर्वाः औपचारिकप्रक्रियाः सम्पन्नाः कृताः, ततः नाबीढाङ्गस्थाने रात्रिविश्रामः कृतः। शनिवासरे प्रातः प्रायः १०:१५ वादने चीनदेशस्य अधिकारिभिः आवश्यकपरीक्षणानन्तरम् अनुमतिः प्रदत्ता। ततः दलः सीमां अतिक्रम्य तकलाकोटम् उपगतः तथा व्यापारिकक्रियाकलापानां शुभारम्भम् अकरोत्। तेन उक्तं यत् चीनप्रशासनस्य निर्देशानुसारम् अधुना केवलं तेभ्यः वणिग्भ्यः प्रवेशः प्रदत्तः ये पूर्वमेव पञ्जीकृताः सन्ति तथा पूर्वमपि सीमाव्यापारं कृतवन्तः। एतस्मात् कारणात् प्रथमः व्यापारिकदलः भारततः नूतनां व्यापारिकसामग्रीं न नीतवान्। वणिजः तकलाकोटस्थे पूर्वसञ्चितसामग्रीम् आवश्यकौपचारिकप्रक्रियाश्च आधृत्य व्यापारिककार्याणि सम्पादयिष्यन्ति। प्रशासनस्य अनुसारं आगामीव्यापारिकदलानां तिथीनां विषये चीनप्रशासनेन सह निरन्तरम् ईमेलमाध्यमेन समन्वयः क्रियते।

# पञ्चकोटिगृहेषु राष्ट्रध्वजोत्तोलयितुं लक्ष्यं निर्धारितम् : योगी आदित्यनाथः



**हिमसंस्कृतवार्ताः — सत्येन्द्र पाठकः, लखनऊ।** उत्तरप्रदेशसर्वकारः स्वातन्त्र्यदिवसस्य आयोजनं जनभागीदारीयुक्तं राष्ट्रोत्सवरूपेण कर्तुं सज्जतां करोति। मुख्यमन्त्री योगी आदित्यनाथः अस्मिन् वर्षे 'हर घर तिरंगा' अभियानस्य अन्तर्गतं आगामी १४ तथा १५ अगस्त-दिनाङ्कयोः पञ्चकोटिगृहेषु राष्ट्रध्वजोत्तोलयितुं लक्ष्यं निर्धारितवान्। मुख्यमन्त्रिणा प्रदेशवासिभ्यः 'हर घर तिरंगा' अभियानं जनान्दोलनरूपेण सफलं कर्तुं अधिकाधिकसहभागितायै आह्वानं कृतम्। सर्वकारीय-अर्धसर्वकारीय-सहायताप्राप्तसंस्थाभिः, स्थानीयनिकायैः, शैक्षणिकसंस्थाभिः, ग्रामपञ्चायतैः, उचितदरविपणिभिः, औद्योगिकैः व्यावसायिकैश्च प्रतिष्ठानैः सम्मानपूर्वकं राष्ट्रध्वजोत्तोलयितुं निर्देशाः प्रदत्ताः। उच्चस्तरीय-समीक्षासभायां मुख्यमन्त्रिणा 'हर घर तिरंगा' अभियानस्य, विभाजन-विभीषिका-स्मृतिदिवसस्य तथा स्वातन्त्र्यदिवसस्य सज्जतायाः समीक्षा कृता। तेन अगस्तमासस्य ९ दिनाङ्कात् काकोरी-ट्रेन-एक्शन-दिवसस्य कार्यक्रमैः आरभ्य स्वातन्त्र्यदिवसपर्यन्तं तिरङ्गायात्रा, सांस्कृतिककार्यक्रमाः, प्रदर्शन्यः, कैंडलमार्च, शहीदस्थलेषु श्रद्धाञ्जलिः तथा विभाजन-विभीषिका-स्मृतिदिवसस्य विशेषकार्यक्रमाः आयोजयितुं निर्देशाः प्रदत्ताः। मुख्यमन्त्रिणा अगस्तमासस्य १४ तथा १५ दिनाङ्कयोः प्रदेशस्य सर्वेषु चलचित्रगृहेषु राष्ट्रगीतस्य राष्ट्रगानस्य च अनिवार्यप्रसारणस्य निर्देशः अपि प्रदत्तः। काकोरी-ट्रेन-एक्शन-दिवसात् स्वातन्त्र्यदिवसपर्यन्तं विविधकार्यक्रमैः नवपीढीं स्वातन्त्र्यसङ्ग्रामस्य इतिहासेन राष्ट्रस्य एकतायाः भावनया च सम्बद्धां कर्तुं बलं दत्तम्। २०२५ तमे वर्षे ४.७८ कोटिगृहेषु राष्ट्रध्वजः फहरितः आसीत्। अस्मिन् वर्षे सर्वकारेण तस्मात् अधिकं व्यापकं जनसहभागितापूर्णं 'हर घर तिरंगा' अभियानं आयोजयितुं लक्ष्यं निर्धारितम् अस्ति।

# मारुति-सुजुकी उद्योगेन यद्यपि वाहनविक्रयः अतीव अधिकः अभवत् तथापि लाभे न्यूनः




**हिमसंस्कृतवार्ता, रविः खरिडेहालः-** मारुति-सुजुकी उद्योगेन अस्मिन् वित्तवर्षे प्रथमत्रिमासे शुद्धलाभः पूर्ववर्षस्य प्रथमत्रिमासे न्यूनः अस्ति। शुद्धलाभः ९.११% न्यूनम् अस्ति। शुद्धलाभसङ्ख्या ३४४६.९ कोटिरूप्यकाणि अस्ति। वाहननिर्माय सामग्रीव्ययः अतीव अधिकः अभवत्। यद्यपि वाहनविक्रयः अतीव अधिकः अभवत् तथापि लाभे न्यूनः अभवत्। अस्मिन् त्रैमासिके सामग्रीव्ययः ३२,०१३.२ कोटिरूप्यकाणि आसीत्। २०२५-२६ प्रथमत्रिमासे एते व्ययः २१,९३६.८ कोटिरूप्यकाणि आसन्। सामग्रीव्ययः वर्धितः। व्यावसायिक संचालनात् प्राप्तः रजस्वः ३५.९% अधिकः अभवत्। अस्मिन् प्रथमत्रिमासे राजस्वसङ्ख्या ५२,६४९.८ कोटिरूप्यकाणि अस्ति। पूर्ववर्षस्य प्रथमत्रिमासे राजस्वसङ्ख्या ३८,६०५.२ रुप्यकाणि अस्ति।

# मुख्यमंत्री धामी अश्रृणोत् जनसमस्याः, त्वरित निस्तारणाय अददात् निर्देशान्



खटीमा, 01 अगस्तमासः।मुख्यमन्त्री पुष्करसिंहधामी शनिवासरे लोहियाहेड् हेलीपदस्थिते शिविरकार्यालये जनसामान्यैः जनप्रतिनिधिभिश्च सह समागत्य तेषां समस्याः सुझावांश्च अशृणोत्। तेन सम्बद्धाधिकारिभ्यः प्राप्तानां शिकायतानां प्राथम्येन शीघ्रं पारदर्शिरूपेण गुणात्मकतया च निस्तारणं सुनिश्चितं कर्तुम् निर्देशाः प्रदत्ताः।मुख्यमन्त्री अवदत् यत् जनसेवा एव शासनस्य मूलोद्देश्यः अस्ति तथा च सामान्यजनानां समस्यासु समयबद्धसमाधानं राज्यसर्वकारस्य सर्वोच्चप्राथमिकतासु अन्तर्भवति। तेन अधिकारिणः प्रत्येकस्य शिकायतायाः संवेदनशीलतया परीक्षणं कृत्वा प्रभाविसमाधानं सुनिश्चितं कर्तुम् आदिष्टाः, येन जनाः अनावश्यकतया कार्यालयानां परिभ्रमणं न कुर्वेयुः।तेन उक्तं यत् राज्यसर्वकारः सरलीकरणम् समाधानम् सन्तुष्टिश्च इति मन्त्रं पुरस्कृत्य कार्यं करोति। शासनप्रशासनयोः उत्तरदायित्वं तदैव सार्थकं भवति, यदा सामान्यनागरिकः स्वसमस्यायाः शीघ्रं सन्तोषजनकं च समाधानं प्राप्नोति। मुख्यमन्त्री जनहितसम्बद्धेषु विषयेषु पूर्णगम्भीरतया पारदर्शितया संवेदनशीलतया च कार्यं कर्तुम् अधिकारिणः निर्देशितवान्।मुख्यमन्त्री एतस्मिन् अवसरे जनप्रतिनिधिभिः सह क्षेत्रस्य विकाससम्बद्धावश्यकतासु जनहितविषयेषु च चर्चामकरोत् तथा च विकासकार्याणां गतिवर्धनाय नागरिकसुविधानां सुदृढीकरणाय च शासनस्य प्रतिबद्धतां पुनरुक्तवान्।तदनन्तरं मुख्यमन्त्री २७ दिव्याङ्गजनान् ७७ सहायकयन्त्राणि तथा २२ वरिष्ठनागरिकान् ११३ सहायकयन्त्राणि वितरितवान्। एतेषु ११ वैद्युतरिक्शाः, १४ चलनासनानि, १८ शौचासनानि, ६ त्रिचक्रिकाः, २४ श्रवणयन्त्राणि, ४० जानुसमर्थकपट्टिकाः, १३ वैशाखिकाः तथा भ्रमणसहायकदण्डाः, सिलिकॉनपीठिकाः, सीपीआसनानि च समाविष्टानि सन्ति।तेन ग्रामोत्थानरीपयोजनायाः अन्तर्गतं नारीशक्तिग्रामसङ्गठनं गदरपुर तथा सत्यमेवजयते सीएलएफ बाजपुर इत्येताभ्यां बोलेरोयानस्य कुञ्जिका समर्पिता, एकता सीएलएफ गदरपुर इत्यस्मै च खाद्यपरिवहनयानस्य कुञ्जिका प्रदत्ता।अस्मिन् अवसरे दर्जामन्त्री अनिलकपूरडब्बू, किशनसिंहकिन्ना, गम्भीरसिंहधामी, रणजीतसिंहनामधारी, मोहिनीपोखरिया, जिलाधिकारी नितिनसिंहभदौरिया, वरिष्ठपुलिसाधीक्षकः अजयगणपति, मुख्यविकासाधिकारी दिवेशशासनी, अपरजिलाधिकारी कौस्तुभमिश्रः, जिला समाजकल्याणाधिकारी अमनअनिरुद्धः तथा अन्ये जनप्रतिनिधयः अधिकारिणश्च उपस्थिताः आसन्।

# चलच्चित्रवार्ता: प्रथमवारं स्वपुत्रेण करणदेओलेन सह 'बंटवारा १९४७' इति चलच्चित्रे दृष्यते सन्नी देओलः




**हिमसंस्कृतवार्ताः- जगदीश डाभी, मुम्बई।** बॉलीवुड-अभिनेतृषु प्रसिद्धः सुपरस्टार सन्नी देओलः विगतदशकेभ्यः चलच्चित्रेषु कार्यं करोति। तेन अनेकेषु उत्तमेषु चलच्चित्रेषु अभिनयः कृतः। एतेषु दिनेषु सन्नी-महोदयः स्वस्य 'बंटवारा १९४७' इति चलच्चित्रस्य कारणेन चर्चायाम् अस्ति, यत् अगस्तमासस्य चतुर्दशदिनाङ्के (१४ अगस्ते) प्रसारितं भविष्यति। अस्मिन् चलच्चित्रे भारत-पाकिस्तान-विभाजनकालस्य कथा दर्शिता अस्ति। अस्मिन् सन्नी-महोदयः 'गदर' इति चलच्चित्रस्य 'तारा सिंह' इव रूपे दृश्यिष्यते। सः चलच्चित्रे प्रभावशालिनीं क्रियां कुर्वन् अपि द्रक्ष्यते। अस्य चलच्चित्रस्य सर्वथा विशेषः पक्षः एषः यत् अस्मिन् सन्नी देओलस्य वास्तविकः पुत्रः करणदेओलः अपि दृष्यते। 'बंटवारा १९४७' इति सन्नी देओलस्य करण देओलस्य च सह एव प्रथमं चलच्चित्रम् अस्ति। रोचका वार्ता इयं यत् चलच्चित्रे अपि करणः सन्नी देओलस्य पुत्रस्य एव भूमिकां निर्वहति। अर्थात् उभौ बृहत्पटले अपि पितृ-पुत्रयोः रूपे दृश्यिष्येते। अनुरागिणः अस्य चलच्चित्रस्य सोत्कण्ठं प्रतीक्षां कुर्वन्तः सन्ति। प्रथमवारं पितृ-पुत्रयोः एतत् युग्लं बृहत्पटले सह द्रष्टुं प्रेक्षकेषु महद् उत्साहः वर्धते। अपरञ्च, सामाजिक-माध्यमेषु इयं चर्चा अपि प्रचलति यत् चलच्चित्रम् इदं सफलं भविष्यति उत असफलम् इति। इयं चित्रपट-रचना भारत-पाकिस्तान-विभाजनस्य पृष्ठभूमौ आधारिता अस्ति। सन्नी देओलस्य इतः पूर्वं भारत-पाकिस्तान-विषये निर्मिताः अनेकाः रचनाः प्रेक्षकैः भृशं रोचिताः। ईदृशे सति एतत् मन्यते यत् 'बंटवारा १९४७' इत्यपि वृत्ति-पटले (बॉक्स-ऑफ़िस-मध्ये) उत्तमं प्रदर्शनं कर्तुं शक्नोति। एतदतिरिच्य, अस्य चलच्चित्रस्य प्रचार- दृश्येभ्यः (ट्रेलर इत्यस्मै) प्राप्ताः कोटिशः दर्शनसंख्याः अपि एतं प्रति प्रेक्षकानाम् अभिरुचिं दर्शयन्ति। तथापि, चलच्चित्रम् इदं सफलं भविष्यति उत असफलं (फ्लॉप) इति, अस्य निर्णयः तु अस्य प्रसारणात् अनन्तरं प्रेक्षकाः एव करिष्यन्ति।

# "रामायणकालिकं समाज वर्णनम्"

रामायणकालिकं समाजपरिवारस्य स्वरुपं पितृसत्तात्मक आसीत्। अयोध्यतः पित्राज्ञया एव रामः वनम् अगच्छत्। पतिव्रता स्त्रिषु सीता- अनसूया- कौशल्या- सुलोचना इत्यादीनां नामानि प्रसिद्धानि आसन्। शिक्षायाः स्वरुपं मौखिकम् आसीत्। तदानीं चत्वारः वर्णाः चत्वारः आश्रमाः षोडशसंस्काराश्च प्रचलिता आसन्। वाल्मिकि- भरद्वाज- विश्वामित्रादि ऋषीणाम् आश्रमेषु निरन्तरं यज्ञ- अग्निहोत्र- वेदाध्यायन- युद्धविद्यादीनाम् अध्ययनं भवति स्म। भारतीयसमाजस्य संस्कृतेश्च समुज्ज्वलं मर्यादितं स्वाभाविक स्वरुपं यथा रामायणे परिदृश्यते तथा नान्यत्र कुत्रापि।

**वर्षा प्रकाश टोणगांवकर पुणे, महाराष्ट्रम्**

# मैत्री- जीवनस्य पवित्रतमः सम्बन्धः

अस्मिन् जगति अनेकाः सम्बन्धाः भवन्ति, परन्तु मैत्री तादृशः सम्बन्धः अस्ति यं वयं स्वयमेव चिनुमः। माता-पिता भ्राता च अस्माकं परिवारे जन्म प्राप्नुवन्ति, परं मित्रम् अस्माकं स्वस्य रुच्या मिलति। यदा कः अपि जनः अन्येन सह स्वस्य सुखं-दुःखं च वदति, तदा एकः पवित्रः सम्बन्धः आरभ्यते। अयं दिवसः मित्रदिवसः इति रूपेण ज्ञायते, यत्र वयं स्वेषां मित्राणां कृते प्रेमानन्दं प्रकाशयामः। अस्मिन् मित्रदिवसे वयं सर्वे एतत् संकल्पं कुर्मः यत् समाजस्य प्रत्येकस्मिन्स्तरे सौहार्दस्य, आत्मीयतायाः च भावना वर्धेत। सर्वेषां नागरिकानां जीवने मित्रतायाः प्रकाशः सदा प्रज्वलितः भवतु। *हिमसंस्कृतवार्ता'-कुटुम्बात्* सर्वेभ्यः पाठकेभ्यः मैत्रीदिवसस्य हार्दिक्यः शुभकामनाः

**लेखिका - प्रांजल, कानपुरम्, उत्तर प्रदेशः**

हिमसंस्कृतवार्ताः, ईदरधीररजः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ताकार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। मया प्रथमा विचित्रा वार्ता आनीता। खगोलशास्त्रज्ञैः अन्तरिक्षे एकः कृष्णविवरः दृष्टः। तेन पूर्वं ग्रस्तः पदार्थः बहिः वान्तः।

**नन्दिनी-** अहो, कृष्णविवरेण वमनं कृतम् इति अतीव विचित्रम्! मया द्वितीया वार्ता दक्षिण- कोरियादेशात् प्राप्ता। तत्र पालितपशूनां विचारान् ज्ञातुं स्वामिभिः भविष्यसूचकपत्राणां प्रयोगः आरब्धः।

**काव्या-** पशूनां मनः ज्ञातुं पत्राणां प्रयोगः कृतः इति हास्यास्पदम् एव! तृतीया वार्ता उद्योगक्षेत्रात् आनीता। एकेन उद्योगार्थिना अन्तर्जालमाध्यमेन संस्थायाः प्रतिकूलसमीक्षाः पठिताः। अतः तेन साक्षात्कारः अस्वीकृतः, यतः सः संस्थायाः दोषान् दृष्टवान् अस्ति।